अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV-201**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**
**शास्त्री/बी. ए. व्याकरणम् (सत्रम् : द्वितीयम्)**
**प्रथमपत्रम् – संस्कृत व्याकरणम् (क)**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

---

**अवधेयम् :** इदं प्रश्नपत्रम् सप्ततेः (70) अङ्कानां विद्यते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## (काशिकावृत्तिः) 50 अङ्काः

**प्रश्नः1– केषाञ्चित् द्वयोः काशिकारीत्या व्याख्यानं कर्त्तव्यम्।** **(2X5=10)**
(क) सुबामन्त्रिते पराङ्गवत् स्वरे। (ख) उपपदमतिङ्। (ग) कुत्सितानि कुत्सनैः

**प्रश्नः2– केषाञ्चित् सप्तसु पञ्चानां पदकृत्यं कर्तव्यम्।** **(5X2=10)**
(क) कर्तृकरण इति किम् ? (ख) क्रीडार्जीवकयोरिति किम्? (ग) सरूपग्रहणं किम् ?
(घ) संख्यया इति किम् ? (ङ) पदग्रहणं किम् ? (च) नपुंसकमिति किम् ?
(छ) ऋण इति किम् ?

**प्रश्नः3– केषांचित् सप्तसु पञ्चानां वार्त्तिकानां व्याख्यानं कर्त्तव्यम्।** **(5X2=10)**
(क) प्रतिपदविधाना च षष्ठी न समस्यत इति वक्तव्यम्।
(ख) पर्यादियोग्लानाद्यर्थे चतुर्थ्या।
(ग) अभ्यर्हितं च पूर्वं निपततीति वक्तव्यम्। (घ) सर्वनामसंख्ययोरूपसंख्यानम्।
(ङ) अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या।(च) शतसहस्रौ परेणेति वक्तव्यम्।
(छ) कृद्योगा च षष्ठी समस्यत इति वक्तव्यम्।

**प्रश्नः4– केषुचित चतुर्षु शब्देषु द्वयोः सिद्धिः कार्या –** **(2X5=10)**
(क) स्वादुङ्कारम् (ख) पञ्चपूली (ग) द्व्यहः (घ) पञ्चगवधनः

**प्रश्नः5– कासुचित् चतसृषु शङ्कासु द्वयोः समाधानम् –** **(2X5=10)**
(क) तृतीयाप्रभृतीन्यन्यतरस्याम् इति का विभाषा ? कथम् ?
(ख) विशेषणसमासविधायकसूत्रस्य कोऽर्थः ? बहुलग्रहणञ्च किमर्थम् ?
(ग) 'पारे मध्ये षष्ठ्या वा' इत्यत्र वा ग्रहणेन किं क्रियते ? कथम् ?
(घ) 'जरतीभिः' इति स्त्रीलिङ्गनिर्देशेन किं ज्ञाप्यते ? कथम् ?

## (नामिकम्) 20 अङ्काः

**प्रश्नः6– केषुचित् पञ्चसु चतुर्णां शब्दानां रूपं लेखनीयम् –** **(4X2.5=10)**
(क) अदस् (पु.) (ख) विद्वस् (पु.) (ग) रै (पु.) (घ) ब्रह्मबन्धू (स्त्री.) (ङ) सोमपा (न.)

**प्रश्नः7– केषुचित् पञ्चसु चतुर्णां मुख्यसूत्रसहिता संक्षेपतः सिद्धिः –** **(4X2.5=10)**
(क) सर्वेषाम् (ख) सखा (ग) मत्यै (घ) अहम् (ङ) भूयान्

---------------x---------------